# ॥ वाल्मीकि रामायण॥

## १ बालकाण्ड

### अध्याय २५

मुनेर्वचनमक्लीबं श्रुत्वा नरवरात्मजः ।
राघवः प्राञ्जलिर्भूत्वा प्रत्युवाच दृढव्रतः ॥ १॥

पितुर्वचननिर्देशात्पितुर्वचनगौरवात् ।
वचनं कौशिकस्येति कर्तव्यमविशङ्कया ॥ २॥

अनुशिष्टोऽस्म्ययोध्यायां गुरुमध्ये महात्मना ।
पित्रा दशरथेनाहं नावज्ञेयं च तद्वचः ॥ ३॥

सोऽहं पितुर्वचः श्रुत्वा शासनाद्ब्रह्म वादिनः ।
करिष्यामि न सन्देहस्ताटकावधमुत्तमम् ॥ ४॥

गोब्राह्मणहितार्थाय देशस्यास्य सुखाय च ।
तव चैवाप्रमेयस्य वचनं कर्तुमुद्यतः ॥ ५॥

एवमुक्त्वा धनुर्मध्ये बद्ध्वा मुष्टिमरिन्दमः ।
ज्याशब्दमकरोत्तीव्रं दिशः शब्देन पूरयन् ॥ ६॥

तेन शब्देन वित्रस्तास्ताटका वनवासिनः ।
ताटका च सुसङ्क्रुद्धा तेन शब्देन मोहिता ॥ ७॥

तं शब्दमभिनिध्याय राक्षसी क्रोधमूर्छिता ।
श्रुत्वा चाभ्यद्रवद्वेगाद्यतः शब्दो विनिःसृतः ॥ ८॥

तां दृष्ट्वा राघवः क्रुद्धां विकृतां विकृताननाम् ।
प्रमाणेनातिवृद्धां च लक्ष्मणं सोऽभ्यभाषत ॥ ९॥

पश्य लक्ष्मण यक्षिण्या भैरवं दारुणं वपुः ।
भिद्येरन्दर्शनादस्या भीरूणां हृदयानि च ॥ १०॥

एनां पश्य दुराधर्षां माया बलसमन्विताम् ।
विनिवृत्तां करोम्यद्य हृतकर्णाग्रनासिकाम् ॥ ११॥

न ह्येनामुत्सहे हन्तुं स्त्रीस्वभावेन रक्षिताम् ।
वीर्यं चास्या गतिं चापि हनिष्यामीति मे मतिः ॥ १२॥

एवं ब्रुवाणे रामे तु ताटका क्रोधमूर्छिता ।
उद्यम्य बाहू गर्जन्ती राममेवाभ्यधावत ॥ १३॥

तामापतन्तीं वेगेन विक्रान्तामशनीम् इव ।
शरेणोरसि विव्याध सा पपात ममार च ॥ १४॥

तां हतां भीमसङ्काशां दृष्ट्वा सुरपतिस्तदा ।
साधु साध्विति काकुत्स्थं सुराश्च समपूजयन् ॥ १५॥

उवाच परमप्रीतः सहस्राक्षः पुरन्दरः ।
सुराश्च सर्वे संहृष्टा विश्वामित्रमथाब्रुवन् ॥ १६॥

मुने कौशिके भद्रं ते सेन्द्राः सर्वे मरुद्गणाः ।
तोषिताः कर्मणानेन स्नेहं दर्शय राघवे ॥ १७॥

प्रजापतेर्भृशाश्वस्य पुत्रान्सत्यपराक्रमान् ।
तपोबलभृतान्ब्रह्मन्राघवाय निवेदय ॥ १८॥

पात्रभूतश्च ते ब्रह्मंस्तवानुगमने धृतः ।
कर्तव्यं च महत्कर्म सुराणां राजसूनुना ॥ १९॥

एवमुक्त्वा सुराः सर्वे हृष्टा जग्मुर्यथागतम् ।
विश्वामित्रं पूजयित्वा ततः सन्ध्या प्रवर्तते ॥ २०॥

ततो मुनिवरः प्रीतिस्ताटका वधतोषितः ।
मूर्ध्नि राममुपाघ्राय इदं वचनमब्रवीत् ॥ २१॥

इहाद्य रजनीं राम वसेम शुभदर्शन ।
श्वः प्रभाते गमिष्यामस्तदाश्रमपदं मम ॥ २२॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made

publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com